No. २४०२ / क

Title बटुकदीपदान पद्धतिः

Author

Extent ४ पत्र Age

Subject तन्त्र

वटुकदीपदानपद्धति

नं० १८०१

नं. २५३

साधुधायसपतिकायसवाहनायनमः दक्षिणे ऐंह्रींश्रीं
यमायः नैर्ऋत्ये: ऐंह्रींश्रींनैर्ऋत्येरक्षणायः पश्चिमे ऐंह्रींश्रीं
वायव्याधिपतये उत्तरे ऐंह्रींश्रींकुबेरायः ईशाने ऐंह्रींश्रींई
श्वरमारुद्राय: ऊर्ध्वं ऐंह्रींश्रींब्रह्मणेः पाताले ऐंह्रींश्रींअ
नन्ताय॥ मध्ये ऐंह्रींश्रींवटुकाय॥ इति नवमावरणं पूर्वे
ऐंह्रींश्रींकालभैरवाय॥ आग्नेये ऐंह्रींश्रींरुरुभैरवाय॥
दक्षिणे ऐंह्रींश्रींचंडभैरवाय॥ नैर्ऋते ऐंह्रींश्रींक्रोधभै
रवाय॥ पश्चिमे ऐंह्रींश्रींउन्मत्तभैरवाय॥ वायव्ये ऐं
ह्रींश्रींकपालभैरवाय॥ उत्तरे ऐंह्रींश्रींभीषणभैरवाय
॥ ईशाने ऐंह्रींश्रींसंहारभैरवाय॥ ऊर्ध्वे ऐंह्रींश्रींविधात
भैरवाय॥ इतिदशमावरणं ऐंह्रींश्रींक्षेत्रपालभैरवाय॥
ऐंह्रींश्रींमहाभैरवाय॥ ऐंह्रींश्रींसिद्धनाथभैरवाय॥
ऐंह्रींश्रींसिद्धयोगीश्वरभैरवाय॥ ऐंह्रींश्रींपरमभैरवा
य॥ ऐंह्रींश्रींसत्वादिस्वरूपाय॥ मध्ये ऐंह्रींश्रींवटुकभै
रवाय॥ इत्येकादशमावरणम् श्रीवटुकायचंदनंपुष्प
धूपंदीपंनैवेद्यंफलंमध्येतांबूलमारार्तिकंपूजांतबलि
दानं अथबलिदानं तत्रबलिर्द्विविधः सात्विकराजश्चे
ति ब्राह्मणो नियतः शुद्धः सात्विकः पायसान्नादिघृता
क्तमेकेनज्ञातीयंबलिद्रव्यकं त्रिमधुरकंचघृतशर्क
रामधुराणिमोदकानि माषवटकानि अन्नकैरन्यैर्वि
विधभक्ष्यद्रव्यैर्बलिर्देयः नैमित्तिकेकाम्येचराजसोबलि
र्देयः दिवसेप्रत्यहंकीपूजांनित्यबलिद्रव्यसंपाद्यराजसोब
लिंदद्यात् शुद्धासनेउपविश्याचम्यमूलेनप्राणायामंदे
शकालौसंकीर्त्यामुकफलावाप्तयेश्रीवटुकभैरवप्री
तयेबलिदानमकरिष्ये इतिसंकल्पः आदौविघ्नेशंगु
रुंविधायावृत्तंसंपूर्वोक्तप्रकारेणरक्तचंदनरक्तपु
ष्पाक्षतैर्नानोपहारैःसावरणंदेवमभ्यर्च्यः दीपाग्ने
त्रिकोणचतुरस्रंवामंडलंकृत्वातस्मिन्स्वर्णादिपात्र

कुवलाकारंसंपादितंलिंनिधायनमः इतिबलि
समर्पणः हस्तेजलमादायमूलमन्त्रमुच्चार्य्यजलिभू
मौनिक्षिप्यस्वहस्तेजलमादायदेवमस्तजीप्रवर
दंप्रमुध्यायंस्तथाशक्त्यामूलजपेत् अशक्तोवट
कादिनाबलिंदत्वास्तोत्रपाठादिकार्य्यं बलिदानेन
वांछितंसिध्यति राजसबलिदानविधिरप्येवमेव
सात्विकंबलिद्रव्यंसात्विकंध्यानं राजसबलिदान
विषयेत्वसतो वर्जनीयाः इतिपूजांतेबलिदानविधिः
दीपमंत्रेणदीपप्रार्थना ॐह्रींश्रींक्लींक्रौंश्रींस
र्वराजायप्रचंडपराक्रमायवटुकायइमंदीपंगृह्ण
णममसर्वकार्य्याणिसाधय २ दुष्टान्नाशय २
त्रासय २ सर्वंजनोममरक्षांकुरु २ हुंफट्स्वाहा
इतिदीपमंत्रेणदीपप्रार्थना ममसन्तुष्टोभव
ममकार्य्यंकुरु २ ईप्सितंदेहिममसर्वविघ्नान्ना
शय २ स्वाहा ततोभैरवगायत्रीजपः ॐतत्पु
रुषायविद्महे आपदुद्धारणायधीमहि तन्नो
वटुकः प्रचोदयात् इतिवटुकगायत्री ततःकव
चमंत्रस्तवराजेषुनःकवचंजपेत् संपुटेन ह्सौं
ह्सैंकलरी ह्सैंवटुकभैरवकुरुव्यन्तरमहा
मंत्रः वा आपदुद्धारकमंत्रंजपेत् इति डामरतंत्रे
श्रीवटुकभैरवदीपान्तकमसमाप्तिमगात्
श्मशानभैरवीरुधिरांतरसांभक्षिणीसिद्धिंमे
देहिममनोरथान्पूरयाहुंफट्स्वाहा इतिश्री

गुरुप्रोक्तमपादाज्ञः श्रीब्रह्मार्पणमौक्तिनाक्तिय
तेरामचंद्रेणदीपदानविधिक्रमः तत्रशुद्धकालः
वैशाखश्रवणकार्तिकः पंचके शुद्धपक्षेप्रकर्तव्या
यावत्कृष्णास्य पंचमीरविचन्द्रगुरुसौम्यभृगुवास
राः शुभप्रदाः स्वातीपुष्यविशाखास्वतिरोहिणीश्र
वणोत्तरात्रयज्येष्ठे दीपदाने शुभप्रदा पंचमीसप्तमी
चैवद्वितीयाप्रतिपतथा सौभाग्यशोभनायुष्मान्ध्रु
कर्माधृतिप्रीतिके वृद्धिवैधृतियाते यते योगाः शु
भाः स्मृताः गावालवकौलवं सदैवंशुभम्रवः श्री
ष्मवर्जेशुभास्तेपरिकीर्तिताः मासद्वयात्मकंश्रेष्ठ
दिनंचैवदिनार्द्धकं सूर्योदयसमारभ्ययवदस्तंगते
रवौ अहोरात्रप्रमाणेनग्रीष्मादिपरिकीर्तिता मा
सद्वयात्मकंश्रेष्ठं दिनंचैवदिनार्थकं दिवापूर्वाह्नि
काकालेमध्यरात्रेनिशितथाः तदभावेसर्वस्त
त्रैव तु सूर्यचन्द्रोपरागयोः अर्द्धोदयमहाष्टम्याका
लमाकुष्णरात्रिके इतिकालविचार अथपात्र
विचार सुवर्णंसिद्धिदंपात्रं वश्यैरौप्यंप्रकल्प १०
येत् विद्वेषणकरंलौहंमारणेमृन्मयंतथा
उच्चाटनकरंकाष्ठं मोहेचपैत्तलंस्मृतं अन्नो
क्तंसर्वकामेषु सर्वभावेतुनास्यनम् २ सेतं

२ शान्तौ स्तंभे तु पीतं वश्ये माञ्जिष्ठरक्तकं विद्वे
2 षे कर्बुरं प्रोक्तं मारणे कृष्णसूत्रकं सर्वभावे
प्रकर्तव्यं श्वेतसूत्रप्रयत्नते एकावर्तिः प्रो
तः सप्तएकविंशतिसंख्यया अयुग्मा च प्रक
र्तव्या युग्मा नैव कारयेत् वर्तिका प्रकर्तव्या
तिस्रो वह्नित्रयस्तथा गोघृते सर्वसिद्धिः स्यात् मा
हिषं मारणे स्मृतं उष्ट्रं विद्वेषणे प्रोक्तं गोघृतं
शान्तिकर्मणि अजा उच्चाटनकरं सर्वाभावे गो
घृतं घृताभावे तु तैलं स्यात् तिलतैलं विशेष
तः घृतेन दीपदानं च तिलतैलेन वा पुनः रस
मेदोद्भवं तैलं प्रयत्नेन विवर्जयेत् दीपमंत्रं
च पिंडं च मृदन्तु तिष्ठतु अथ पात्रमानं विं
शपलद्रव्येण वश्ये चैवादिकर्मणि त्रिंश
त्पलमिते पात्रे मानं तत्र हि कीर्तितं षष्टिपल
मिते पात्रे तु योच्छ्राहे नवांगुलं अंगुलानि च
तु विंशद्व्यामे परिकीर्तिता पंचशतमिते
तैले सर्वशत्रुविनाशनं द्विपंचाशत्मिते
पात्रे तु योच्छ्राहे तु षष्टिवत् शतपलमिते
तैले दीपात् शत्रुविनाशनम् शतपल
मिते पात्रे उच्छ्राहे द्वादशांगुलं ॥ ॥

द्वात्रिंशद्वै वव्यायामे तन्मध्ये तु सहस्रकसर्वकर्म
स्य सिद्धिः स्याद्दीपे पलसहस्रके पंचदशांगुलेत्वा
हे व्यायामे च षडेशके अष्टुतंपलेदीपेचविगडहे
यमुच्यते सहस्रपलकृतेदीपेवधमोतप्रजायते
त्रिंशत्पलमितेपात्रेमानंचैवपूर्ववत् त्रिशत्पलमिते
तैलेदीपात्मेकोनविंशति कंन्याभिकांक्षितैतैलेप्र
त्यहंदीपमाचरेत् ईप्सितांचलभेकंन्याभेरवस्यप्रसा
दतः षोडसपलमितेपात्रे उद्धाहे चदशांगुले विंश
त्पलैकृतेदीपेप्रत्यहं विंशतीदीनं सर्वरोगप्रणाशाय
त्तयापस्मारकुष्टवान् दशपलमितेत्रुधो द्वाहेतवि
शवत् दशपलमितेतैलेप्रत्यहंसमूर्यवासरं राज
वश्यकरंलिंत्रयदिसातादृशाकृतिर्भवेत् त्रिंशत्पल
मितेपात्रेत्रुधोद्वाहेतपूर्ववत् त्रिंशत्पलयुतेतैलेह
ड्रोगनिमाशने एकादशपलमितेपात्रेउद्वाहेतप
डंगुले पंचविंसत्पलेतैलेदीपाद्भूतादिनाशनं एका
दशपलेपात्रेत्रुधोद्वाहेतपूर्ववत् षोडसपलेकृते
पात्रेग्रहपीडानिवारणेशतपलमितेपात्रेत्रुधोद्वा
हेतषोडशः व्यायामेतभवेत्साईंचनविंशतिरंगुले
तन्मध्येतुप्रकर्तव्योदीपःशतःत्रयःस्त्रतः सिंहव्या
घ्रादिसर्पाणांभयंनवप्रजायते एकादशपलेपत्रे
पात्रेउद्वाचैवपूर्ववत् अष्टपलेहुतेदीपायाधाकाले
तुकारयेत् तस्ममार्गेभयंनास्तिम्लेछघाटहमान्तु
यात् त्रिंशत्पलमितेपात्रेव्यायामेचैवपूर्ववत् शतप
लमितेतैलेमेधारोग्यविवर्धनं नित्यदीपप्रमाणेतपा
त्रेपलत्रयसूत्रे त्रुधोद्वाहे भवेत्साईंमेगुष्ठोदरम

गः तन्मध्ये तु भवेत्तैलं पलमात्रं पलार्द्धकं तत्र दीपं तु प्र
ज्वाल्य कामनापूरतस्तथा अंगुष्ठोदर वर्त्तिश्चायामे
परिकीर्त्तिता एकावर्त्तिः प्रकर्त्तव्या एकविंशतितन्तुभिः
पात्रमध्ये भवेन्मायां षट्कोणं त्रिकोणकं स्थापयेत्पात्रम
ध्ये तु रक्तचंदनेनालिखेत् तन्मध्ये च भवेद्दतिन्यासपूर्वव
लिं दद्यात् आवरणानि ततः कुर्यादेकादशवसंख्यया दिक्
पालाल्लोकपालांश्च समग्रे परितः सवाहनान् सायुधांश्च प
ञ्चिपुत्रादिभिर्युतान् अपसर्पणं पूर्वं हि ततः सर्वत्र पूजये
त् ततः पंचोपचारैश्च वटुकं प्रति पूजयेत् धूपदीपादिनै
वेद्यैस्तांबूलारात्रिकादिभिः प्रदक्षिणनमस्कारं समर्प्य
बलिं पूर्ववत् जपांते च जपांते च बलिदाने शुभः प्रदा
वटुकेन च मंत्रेण अष्टभैरवतो बलिं शत्रुपक्षस्य रुधि
रैः पोषणीं च दिने दिने भक्षयेत्स्वगणैः सार्द्धं सारमेयसम
न्वितं बलिमंत्रोपमाख्यातः सर्वेषां विजयः प्रदः अनेन
बलिना दृष्टः वटुकः परमं सर्वगणेभ्यो विभजेद्दा
मिषं क्रुद्धचेतसः एवं कृते शत्रुबलं क्षीयते नात्र संशयः
अनेन हनुमानं च दशविद्यावटुकं रविपक्ष्मावतांश्च वर्णांश्च
श्मशानभैरवीं तथा कूटस्थां च महाविद्यान्तसिद्धेश्व
षोडशी त्रिदशाख्यतारासां च तथैव दशपंचकं चंडीमंत्रे
षु सर्वेषु गणयेषु तथैव च एते देवप्रिया देवी कलौ स
र्वार्थदायकाः अतः परं प्रवक्ष्यामि सिद्धकामस्य साधके
अयायासेन देवेशि देवतास्तु प्रसीदति मंत्रमात्रे देवेशि
कृते च वरसिद्धिदाः कवचेन वमंत्रेण त्रेतायां सिद्धि
दायकां स्तवराजं पठेन्मंत्रे कवचे द्वापरे प्रिये कलौ च
मंत्रकवचे सहस्रनामस्तवेषु नः पंजरे दीपमात्रेण
सर्वसिद्धिप्रदायकं दीपदाने प्रकुर्वते कामनापूरतःस्व

धीः दीपाग्रे प्रजपेत्सर्वं कवचं तु विशेषतः होमांते च
जपांते च दीपांते चैव पार्वति साधकाय निभाषते न
तद्वचनमन्यथा कवचः स्तवराजश्च दीपाग्रे प्रपठेत्सु
धीः ततो मंत्रं जपेत्कुर्याद्देवतायै समर्पयेत् यं यं चिंत
यते कामं तं तं प्राप्नोति साधकः यदक्षरपदेनैव सर्वं
पापक्षमस्व मे यं यं चिंतयते कामं तं तं प्राप्नोति मानवः
स्तवराजस्य तेनैव फलं प्राप्नोति मानवः स्तवराजस
हस्रेण लभते वांछितं फलं एकादशसहस्रेण तस्य
सिद्धिरनेकधा संपुटः स्तवराजेन मंत्रमष्टोत्तरं शतं
पुरश्चरणं तु कुर्यादेकादशसहस्रकं धनार्थी च सुता
र्थी च दारार्थी वापि मानवः रात्रौ दीपं च प्रज्वाल्य स्तवरा
जस्य पठते कवचं संपुटेनैव मंत्रराजेन पुनः कृष्णाष्ट
मीं समारभ्य यावत्कृष्णाष्टमी भवेत् तावन्मंत्रं जपेद्रा
त्रौ कार्यो न दिवसे साधकः रात्रौ च प्रथमे यामे तद्धर
तीयावधि तावन्मंत्रं स्तवराजं दीपाग्रे मासपूर्वकं मन
मनसा वचसा काया एकाग्रेणैव कारयेत् स सर्वा
ल्लभते कामान् नात्र कार्या विचारणा सूर्यास्तसमया
मारभ्य यावत्सूर्योदयो भवेत् तावन्मंत्रं जपेद्रात्रौ का
यं सुहिष्य मंत्रवित् तस्य सर्वं प्रजापेत दीपमंत्रप्रभा
वतः अनेन दीपदानेन यं यं कामं च कारयेत् तं काम
सिद्धिमाप्नोति भैरवस्य प्रसादतः इति श्रीवटुकदी
पदानपद्धतिः समाप्तिमगात्



४ ॐ श्रीगणेशाय नमः देशकालौ स्मृत्वा श्रीपरमेश्वरप्री
त्यर्थं श्रौतस्मार्तनित्यकर्मानुष्ठानसिद्ध्यर्थं यज्ञोपवीताभि
मंत्रणं करिष्ये धारणं च समुद्रज्येष्ठाः सलीलस्य मध्यात्
नानायंत्यनिविशमानाः इन्द्रो या वज्री वृषभो रराद ता आ
पो देवीरिह मामवंतु या सां राजा वरुणो याति मध्ये सत्या
नृते अवपश्यं जनानां मधुश्चुतः शुचयो याः पावकास्ता
आपो देवीरिह मामवंतु तिसृभिः पूतो बिंदं स्ववामसु
इष्टुद्रेन साम्ना शुद्धे रुवैपवा हवांसि पुत्र आशीर्वात्म
मस्तु तिसृभिः तरत्समंदी धावति धारा सुतस्यांधसः
तरत्समंदी धावति उस्रा वेद वसूनां मर्तस्य देव्यवसः
तरत्समंदी धावति ध्वस्र्योः पुरुषन्त्योरा सहस्राणि दद्
महे तरत्समंदी धावति शुचीवो हव्या मरुतः शुची
नां शुचीनो मध्वरं शुचिभ्यः ऋतेन सत्यमृतसाप आयं
शुचिजन्मानः शुचयः पावकाः दशवारं गायत्रीजपाभि
मंत्रणम् ॐकारः प्रथमतंतौ न्यसामि अग्नीरः नागर
तीः सोमं चतुः पितॄंश्च पंचमः प्रजापति षष्ठः वायु ७ः
सूर्य ८ः विश्वान्देवान् नवमतंतौ न्यसामि उद्वयंतम
सस्परिस्वः ब्रह्मजज्ञानं प्रथमं पुरस्ताद्वि सीमतः सु
रुचो वेन आवः सबुध्न्या उपमा अस्य विष्ठाः सतश्च यो
निमसतश्च विवः अवकं कं ॐः यज्ञोपवीतं परमं प
वित्रं प्रजापतेर्यत्सहजं पुरस्तात् आयुष्यमग्र्यं प्रति
मुंच शुभ्रं यज्ञोपवीतं बलमस्तु तेजः २
ॐ यज्ञोपवीतं यदि जीर्णवंतं वेदं तवयं यदी स
र्वसत्यं आयुष्यमग्र्यं प्रतिमुंच शुभ्रं जीर्णोपवी
तं विसृजस्तु तेजः ॥